नमो विद्वद्भ्यः

अनध्यायाः - आकालिकाः

कृष्णयजुर्वेदः ( तैत्तिरीयारण्यकम् - सायणभाष्यम् ) - ऐतरेयारण्यकम् - पूर्वमीमांसा - महाभाष्यम् - मनुस्मृतिः - बौधायनस्मृतिः - गौतमस्मृतिः - औशनसस्मृतिः - वसिष्ठस्मृतिः - आपस्तंबस्मृतिः -याज्ञवल्क्यस्मृतिः - आपस्तंबश्रौतसूत्रम् - - नृसिंहपुराणम् - कूर्मपुराणम् - स्मृत्यर्थचन्द्रिका - स्मृत्यर्थसारः – निर्णयसिन्धुः - ज्योतिषम् - रामायणम्

One of my व्याकरणगुरु-s used to follow त्रयोदशी (both) as an अनध्याय as Panini was killed (by a lion - राहु was मारक ) on the same तिथि ।

'अनध्यायेष्वङ्गान्यधीयीत' – so one has to study वेदाङ्ग-s during अनध्याय days. No अनध्याय for ज्योतिषम् etc .

अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेत् ॥
निर्णयसिन्धुः , कूर्मपुराणम् 14-82,83,औशनसस्मृतिः
पर्वणि = पूर्णिमा and अमावास्या ।

I follow तैत्तिरीयारारण्यकम् महाभाष्यम् – रामायणम् – मनुस्मृति --- presently teaching शतरुद्रीयम् ( नमकम् + चमकम् ) to my दौहित्र (daughter's son, कूचि सूर्यांशुशर्मा -11years) – already learnt गणपतिपूजा – पुण्याहवाचनम् – श्रीसूक्तम् – पुरुषसूक्तम् – लघुमन्त्रपुष्पम् – गुरुमन्त्रपुष्पम् – नीराजनम् ।
So we follow – both प्रतिपत् – अष्टमी – चतुर्दशी –- पूर्णिमा – अमावास्या – आशौचम् (जात-मृत) – वर्ष – मेघगर्जन – विद्युत् – महावायु – ग्रहणम् ----
य एवं विद्वान् मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वायौ अमावास्यायां स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्यायः ( तै आ2-14)|

There are only two अनध्याय-s for ब्रह्मयज्ञ as per तै आ 2-16 –

तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्मा'शुचिर्यद्देशः ।

Here the term अशुचिः , following काकाक्षिन्याय , is applicable to both आत्मा and देश । आत्मा is शरीरम् – जाताशौचम् and मृताशौचम् । देशः – प्रदेशः अशुचिः मूत्रादिना ।
एतस्य यज्ञस्य ब्रह्मयज्ञस्य इत्यर्थः ।

अकाले भवः आकालिकः ( कालेभ्यो भववत् पा 4-2-34 , कालाट्ठञ् 4-3-11, ठस्येकः 7-3-50) –
मिताक्षरा – गौतमधर्मसूत्रम् (2-7-22) (alsoयाज्ञ स्मृति 1-147) (मनु 4-103 to 105) –
आकालिका निर्घातभूमिकम्पराहुदर्शनोल्काः सू
'यस्मिन्काले एते भवन्ति परेद्युः तत्पर्यन्तं काल आकालः । तत्संबद्ध आकालिकः।
24 hours from starting भूकम्प etc is आकालिकानध्यायः ।

महाभाष्यम् (मतौ छः सूक्तसाम्नोः 5-2-59 ) –
देशः –देशह् खल्वप्याम्नाये नियतः । श्मशाने नाध्येयम् , चतुश्पथे नाध्येयम् इति ।
कालः – कालखल्वप्याम्नाये नियतः। नामावास्यायामधीयीत , न चतुर्दश्याम् ।
Now there is a question – Haradattamisra in मिताक्षरा on गौतमधर्मसूत्रम् 2-7-36 makes two comments –

( अमावास्यायं च 2-7-35 अमावास्यायाम् अहोरात्रम् अनध्यायः )

द्व्यहं वा – सू
तदहः पूर्वेद्युश्च द्व्यहम् अनध्यायः । शुक्लचतुर्दश्यां त्वनाध्यायस्य मूलान्तरं मृग्यम् ।
एवं प्रतिपत्सु च ।
So there is no प्रमाणम् to show that प्रतिपत् (both) is अनध्याय ।

Here is a verse from रामायणम् ( सुन्दरकाण्डः 59-32) –

सा प्रकृत्यैव तन्वङ्गी तद्वियोगाच्च कर्शिता ।

प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥
May be , this is the प्रमाणाम् those who follow प्रतिपत् as अनध्याय – in fact , this line also does not clearly say that प्रतिपत् is अनध्याय ।
Who is पाठशील ? May be an अर्थवाद – and as such Haradatta did not give much value to this .

अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ।
ब्रह्माष्टकापौर्णमाश्यौ तस्मात्ताः परिवर्जयेत् ॥ मनु 4-114

This is also an अर्थवाद ।

The subject is too vast .

Here अनध्याय means ग्रहणानध्याय ( पार्थसारथिमिश्रः , सोमनाथः , सायणाचार्यः) , i e for learning वेद only . Other kind of अध्ययनम् ( ब्रह्मयज्ञः , कर्मकालः ) would continue – clarifies Jaimini in पूर्वमीमांसादर्शनम् ( अध्या 12 पा 3 अधि 7 सू 18,19 –
मन्त्राणां कर्मसंयोगात् स्वधर्मेण प्रयोगः स्याद्धर्मस्य तन्निमित्तत्वात् – पूवपक्षः।
विद्यां प्रति विधानाद्वा सर्वकालं प्रयोगः स्यात् कर्मार्थत्वात् प्रयोगस्य – सिद्धान्तः।
( कर्मकाले अनध्याये'पि मन्त्राणां प्रयोगाधिकरणम् )
If कर्मकल is also included विधि-s such as दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'are affected—
श्रुतिस्मृत्योर्विरोधे तु श्रुतिरेव गरीयसी – जाबालः ।
आपस्तंबश्रौतसूत्रम् ( 24-1-37) states the same –
स्वाध्याये'नध्यायो मन्त्राणां न कर्मण्यर्थान्तरत्वात् ।
आपस्तंबधर्मसूत्रम् (1-4-12-9) (also मनु 2-105) –
विद्यां प्रत्यनध्यायः श्रूयते न कर्मयोगे मन्त्राणाम् ।
स्मृतिचन्द्रिका (शौनकः) –
नित्ये जपे च काम्ये च क्रतौ पारायणे'पि च ।
नानध्यायो'स्ति वेदानां ग्रहणे ग्राहणे स्मृतः ॥